PVG's

# Muktangan English School & Jr. College, Pune - 9

## Preliminary Examination (2024-25)

## Standard - X

**Subject - Sanskrit (Composite)** **Marks - 40**
**Date - 04/01/2025** **Time : 1:30 pm to 4:30 pm**

## प्रथम विभाग : सुगमसंस्कृतम् (६)

**प्रश्न १ (अ) चित्रं दृष्ट्वा नामानि लिखत। (४ तः ३)** **(३)**

१) 

२) 

३) 

४) 

**प्रश्न १ (आ) सङ्ख्या अक्षरैः अङ्कैः वा लिखत। (३ तः २)** **(२)**

१) द्वात्रिंशत्  २) ९८  ३) ७७

**इ) स्तम्भमेलनं कुरूत।** **(१)**

| अ | ब |
|---|---|
| १) दशाधिक – पञ्चवादनम् | ८.१५ |
| २) सपाद – अष्टवादनम् | ३.०५ |
| | ५.१० |

## द्वितीय विभाग : गद्यम् (१४)

**प्रश्न २ (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।** **(४)**

अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः। क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य सह मृगस्य निवासस्थानं गतः। मृगशृगाली दृष्ट्वा काकोऽवदत्, ''सखे चित्राङ्ग! कोऽयं द्वितीयः?'' मृगः अब्रूत, ''जम्बूकोऽयम्! अस्मत्सख्यम् इच्छति।'' काकः उपादिशत्, ''अकस्मादागन्तुना सह मित्रता न सुक्ता।'' तदाकर्ण्य जम्बूकः सकोपम् आह, ''मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानापि।'' मृगः अब्रवीत, ''अलं विवादेन । वयं सर्वे आनन्देन एकत्र निवसामः।'' काकेनोक्तम्, ''एवमस्तु।''

**१) अवबोधनम् । (३ तः २)** **(२)**

**अ)** उचितं कारणं चित्वा **वाक्यं पुनर्लिखत ।**

शृगालः मृगेण सह सख्यम् इच्छति यतः ----------------------।

**१)** शृगालः मृगमांसं खादितुम् इच्छति ।

**२)** शृगालः मृगे स्निह्यति ।

**(आ) कः कं वदति इति वाक्यं पुनर्लिखित्वा लिखत ।**

''अकस्मादागन्तना सह मित्रता न युक्ता ।''

**(इ) पूर्णवाक्येन उत्तरं लिखत ।**

अरण्यै कौ निवसतः स्म ?'

**२) शब्दज्ञानम् । (३ तः २)** **(२)**

अ) गद्यांशात् २ तृतीयाविभक्यान्तपदे चित्वा लिखत ।

आ) गद्यांशात् विशेषण – विशेष्ययोः मेलनं कुरूत ।

| अ | ब |
|---|---|
| १) भ्रमन् | एकाक्षः |
| २) अस्तङ्गते | चित्राङ्गः |
| | सवितरि |

**इ) पूर्वपदं / उत्तरपदं लिखत ।**

१) केनापि = केन + ________________ ।

२) जम्बूकोऽयम् = __________ + अयम् ।

**प्रश्न २ (आ) गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरूत** **(४)**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः। यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चै आक्रोशत् । ''अम्ब! त्रायस्व । नक्रात् त्रायस्व!'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत – ''अम्ब, इतःपरम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् – ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति'' इति । तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

**१ ) अवबोधनम् (३ तः २)** **(२)**

**अ) वाक्यं पुनर्लिखित्वा सत्यम् । असत्यम् इति लिखत ।**

नक्रः अम्बायाः पादम् अगृह्णात् ।

**आ) पूर्णवाक्येन उत्तरं लिखत ।**

शङ्करः स्नानार्थं कुत्र गतः ?

**इ) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

शङ्करः उच्चैः आक्रोशत् यतः।

अ) सः नदीजले अमज्जत् ।

आ) नक्रः तस्य पादम् अगृह्णात् ।

**२) शब्दज्ञानम् । (३ तः २)** **(२)**

अ) गद्यांशात् त्वान्तपदं चित्वा लिखत ।

आ) प्रश्ननिर्माणं कुरूत ।

<u>**नक्रात्**</u> त्रायस्व ।

इ) सन्धिविग्रहं कुरूत ।

इदानीमेव = _______________+ _______________ ।

**प्रश्न २ (इ) गद्यांश पठित्वा माध्यमभाषया सरलार्थं लिखत ।** **(४)**

**१)** सूतः – धृताः प्रग्रहाः अवतरतु आयुष्मान् ।

दुष्यन्तः – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूत – तथा । (इति निष्क्रान्तः)

**अथवा / Or**

**२)** श्रोतृवृन्द : नदीपूजनम् ? किमर्थं नदीपूजनम्

कीर्तनकार : नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति । द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।

**प्रश्न २ (ई)　माध्यमभाषया उत्तरं लिखत (२ तः १)**　　　　　　　　**(२)**

१)　धरित्र्या: उपदेशं मनसि निधाय पृथुवैन्य: किं किम् अकरोत् ?

२)　शक्रस्य कपटं विशदीकुरुत ।

## तृतीय विभाग : पद्यम् (१०)

**प्रश्न ३ (अ) पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत । (५ तः ४)**　　　　　　　　**(४)**

१)　निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मी: समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथ: प्रविलान्ति पदं न धीरा: ।।

२)　अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि ।
धनं जनेभ्य: किल याचतेऽयम्
न याचको वा न च निर्धनो वा ।।

३)　रामाभिषेके जलमाहरनया
हसात् सृतो हेमघटो युक्त्या: ।
सोपनमार्गेण करोति शब्दं
ठंठं ठठं ठं ठठ ठं ठठं ठ: ।।

**१)　पूर्णवाक्येन उत्तरं लिखत ।**
न्याय्यात्पथ: के न विचलन्ति ?

**२)　जालरेखाचित्रं पूरयत ।**




**३)　सन्धिविग्रह: कुरुत**

जलमाहरन्त्या हस्तात् = 　जलम् + ________ + ________ ।

**४) 'हेमघट' पदस्य कृते विशेषणम् अन्विष्यत लिखत च।**

**५) समानार्थी शब्दः लिखत ।**

लक्ष्मीः -________________ ।

**आ) पद्ये शुद्धे पूर्णे च लिखत (३ तः २)** **(४)**

१) यादृशं ___________________________.।।

२) यथा चतुर्भिः ______________________।।

३) वैद्यराज ________________________ ।।

**इ) माध्यमभाषया सरलार्थं लिखत् । (२ तः १)** **(२)**

१) सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।

२) शीलं सद्‌गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावाहम् ।

## चतुर्थ विभाग : भाषाभ्यासः (१०)

**प्रश्न ४ (अ) पृथक्करणम् ।**

**१) मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** **(२)**

| नाम | सर्वनाम |
|---|---|
| | |
| | |

(मञ्जूषा - मम, राजा, सः नदी, एतस्मिन्)

**२) निर्दिष्टाः कृतीः कुरूत । (५ तः)** **(२)**

| क्रियापदम् | धातुसाधित्-विशेषणम् |
|---|---|
| | |
| | |

(मञ्जूषा - अकथयत्, मुक्तः, लभते, भेतव्यम्, वहतु)

**निर्दिष्टाः कृतीः कुरुत । (४ तः २)** **(४)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)**

क) ______________________ वेदाः वर्तन्ते ।
(चत्वारि, चत्वारः)

ख) श्रीकृष्णः देवक्याः ______________________ अपत्यम् ।
(अष्टमम्, अष्टः)

ग) अहम् एकं पाठं ______________________ समक् पठामि ।
(द्विवारं , द्वौ)

**२) समासविग्रहाणां समासनामाभिः सह मेलनं कुरूत । (६ तः ४)**

| **समासविग्रहः** | **समासनाम** |
|---|---|
| १) चित्रं कारयति इति | षष्ठी तत्पुरुषः । |
| २) जलस्य व्यवस्थापनम् । | कर्मधारय। |
| ३) लगुडः हस्ते यस्य सः। | उपपद – तत्पुरुषः । |
| ४) कवयः च पण्डिताः च | अव्ययीभावः । |
| ५) अहनि अहनि । | बहुव्रीहिः। |
| ६) मानवता एव धर्मः | इतरेतर – द्वन्द्वः |

**३) मञ्जूषात्ः समानार्थक शब्दान् / विरूद्धार्थक शब्दान् चित्वा लिखत ।**

(मञ्जूषा – सुवर्णम्, निन्दा, असत्यम्, मकरः)

१) नक्रः = ______________________।

२) स्तुतिः **X** ______________________।

३) कनकम् = ______________________।

४) सत्यम् **X** ______________________।

**४) योग्यं पर्यायं चिनुत । (३ तः २)**

१) पृथुभूपेन धनुः सज्जीकृतम् ।

(कर्तुवाच्यम् / कर्मवाच्यम्)

२) त्वं द्रष्टुं ____________________ । (शक्नोषि / शक्नोति)

३) वानराः ____________________ फलानि खादन्ति । (मधुराणि, मधुराः)

**इ) विशिष्ट विभाक्तेः उपयोगं कृत्वा वाक्यनिर्माण कुरुत । (४ तः २)** **(२)**

१) कथ् (१० उ. प.)

२) अलम्

३) स्निह् (४ प. प)

४) कृते

■■■